# Navapadyasuratnamala

# नवपद्यसुरत्नमाला

## Document Information

Text title : Navapadyasuratnamala

File name : navapadyasuratnamAlA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : shrInidhiyati

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : June 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 15, 2020

*sanskritdocuments.org*

# नवपद्यसुरत्नमाला

श्रीकान्ततीर्थ गुरुराज कराब्जजात
श्रीनिधिर्यतिरुदार गुणोल्लसन्तीम् ।
श्रीपादराज नवपद्य सुरत्नमालां
भक्त्या करोमि गुरुराज वरप्रसादात् ॥ १॥

श्रीपूर्णबोधकुलवार्धिसुधाकराय
श्रीव्यासराजगुरवे यतिशेखराय ।
श्रीरङ्गविठ्ठलपदाम्बुज बम्भराय
श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ २॥

सम्पूरिताखिल जनोरु मनोरथाय
श्रीमन्नृसिंहसरसीतट संस्थिताय ।
श्रीमत्सुवर्णवर्णसमवर्ण कराब्जजाय
श्रीपादराजगुरवेस्तु नमश्शुभाय ॥ ३॥

श्रीव्यासराज फणिबन्ध निवारकाय
तद्भाषयैव फणिराज सुतोषकाय ।
श्रीमत्सुरत्न खचितोज्ज्वल कुण्डलाय
श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ४॥

श्रीगोपिकापति निवेदित षष्टिशाक-
मुख्योरु भोजन विदूषण तत्पराणाम् ।
सन्दर्शितोरु निजकुक्षिगतार्द्रशाकान्
श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ५॥

श्रीमद्यतीश रघुनाथ मुनेर्विमानात्
पुष्पे स्वमूर्द्निप्रतति प्रसमीक्ष्यचोक्ता ।
संप्रेरितोरु रघुनाथ मुनीश्वराय
श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ६॥

शङ्खस्थितेन पयसा द्विजघातपापे
    दूरीकृते बहुजनेषु वि शङ्कितेषु ।
तेनैव शुद्धमलिनातिपटिच्छराय
    श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ७॥

श्रीमन्नृसिंहसरसी पयसि प्रमोदा-
    द्ध्यायामि तिष्ठ सरसी शुभकारि तीरे ।
स्वप्नेनिबोद्य नळिनी जयदक्षगाभूत्
    श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ८॥

दुर्वादिवारण विदारण दीक्षिताय
    श्रीमद्रमेशचरणाब्जगुहाश्रयाय ।
व्याख्यानिनाद रुचिरोरु मृगाधिपाय
    श्रीपादराज गुरवेस्तु नमश्शुभाय ॥ ९॥

कस्तूरिकादि समलङ्कृत दिव्यदेहं
    दृष्ट्वाविदूषयति मूढजने क्षणेन ।
तत्यागधारित तनूः परिरक्षकाय
    श्रीपादराज गुरुवेस्तु नमश्शुभाय ॥ १०॥

श्रीपादराज नवपद्य सुरत्नमालां
    येधारयन्त्यनुदिनं भुविशुद्धभावाः ।
वृन्दावनस्य पुरतस्सकलेष्टदश्च
    श्रीपादराजगुरुराज हृदब्जवासी ॥ ११॥

इति श्रीनिधियतिविरचिता नवपद्यसुरत्नमाला समाप्ता ।

Encoded and proofread by Krishnananda Achar

*Navapadyasuratnamala*

pdf was typeset on June 15, 2020

Please send corrections to *sanskrit@cheerful.com*